শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী আঞ্জনেযমঙ্গলাষ্টকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী আঞ্জনেযমঙ্গলাষ্টকম্ ॥

ৰৈশাখে মাসি কৃষ্ণাযাং
    দশম্যাং মন্দৱাসরে।
পূর্ৱাভাদ্রপ্রভূতায
    মঙ্গলং শ্রীহনূমতে॥ **1** ॥

করুণারসপূর্ণায ফলাপূপপ্রিযায চ।
মাণিক্যহারকণ্ঠায মঙ্গলং শ্রীহনূমতে॥ **2** ॥

সুৱর্চলাকলত্রায চতুর্ভুজধরায চ।
উষ্ট্রারূঢায ৱীরায মঙ্গলং শ্রীহনূমতে॥ **3** ॥

দিৱ্যমঙ্গলদেহায পীতাম্বরধরায চ।
তপ্তকাঞ্চনৱর্ণায মঙ্গলং শ্রীহনূমতে॥ **4** ॥

ভক্তরক্ষণশীলায জানকীশোকহারিণে।
জ্ৱলৎপাৱকনেত্রায মঙ্গলং শ্রীহনূমতে॥ **5** ॥

পম্পাতীরৱিহারায সৌমিত্রিপ্রাণদাযিনে।
সৃষ্টিকারণভূতায মঙ্গলং শ্রীহনূমতে॥ **6** ॥

রম্ভাৱনৱিহারায গন্ধমাদনৱাসিনে।
সর্ৱলোকৈকনাথায মঙ্গলং শ্রীহনূমতে॥ **7** ॥

পঞ্চাননায ভীমায কালনেমিহরায চ।
কৌণ্ডিন্যগোত্রজাতায মঙ্গলং শ্রীহনূমতে॥ **8** ॥

কেসরীপুত্র দিব্যায সীতান্বেষপরায চ।
ৱানরাণাং ৱরিষ্ঠায মঙ্গলং শ্রীহনূমতে॥ 9॥

॥ শ্রী আঞ্জনেয মঙ্গলাষ্টকং সমাপ্তম্॥